M-2911

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)
प्रश्ननिर्णय	—	ज्योति	अपूर्ण	—	2/8	10	संस्कृत	कागद	10	28	

॥ श्रीगणेशाय नमः ॥ अथ भट्टोजिदीक्षितकृतचतुर्विंशतिमतांतर्गत
प्रवरनिर्णयो लिख्यते ॥ असमानार्षगोत्रजामिति ॥ ऋषेरिदमार्षं
प्रवरः ॥ गोत्रप्रवर्तकस्य मुनेर्व्यावर्तको ण इत्यर्थः ॥ तद्यथा ॥
गोत्रप्रवर्तकस्य भरद्वाजस्य व्यावर्तकांगिरोबृहस्पती ॥ अतएवां
गिरसबार्हस्पत्यभारद्वाजगोत्रोहमिति प्रयुंजते ॥ गोत्रं तु वंशपरंप
राप्रसिद्धं ॥ समाने आर्षे गोत्रे यस्य ॥ तस्माज्जातायानं भवति तामि
त्यर्थः ॥ यास्कवाधुलमौनमौकानां भिन्नगोत्राणामपि भार्गववैत
हव्यसावेतसेति प्रवरैक्यान्न विवाहः ॥ इति माधवादयः ॥ वस्तुत
स्तु वत्सार्ष्टिषेणयोः प्रवरैक्यान्न विवाहः ॥ द्व्यामुष्यायणानां स्वं
हतीनां वसिष्ठैः सगोत्रत्वादविवाहस्य संकीर्णोदाहरणं बोध्यं ॥

एवं कपीनां गर्गादिभिरपि ॥ मातृगोत्रापि वर्ज्यांश्चिन्निषिद्धा ॥ तथा
चस्मात्साबाद वचनं ॥ मातृगोत्रं माध्यंदिनीयानिति ॥ गोत्ररिक्थे
जनयितुर्न भजेद्द्रिमः सुत इति वचनाद्दत्तकस्य यद्यपि पितृगोत्रा
प्राप्ता तथापि नोद्वाह्याः ॥ असगोत्रा च या पितुरिति मनुना पितृत्रा
दोपादानादिति स्मृतिचंद्रिका ॥ प्रवरे त्वय विशेषमाह बौधायनः ॥ ॥
पंचानां त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः ॥ भृगंवंगिरोगणेष्वेवं शे
षेष्वेकोपि वारयेदिति ॥ न च गोत्रप्रवरयोर्मिलितयोः पृथुदासनि
मित्तत्वमशक्यं ॥ प्रत्येकं दोषाभिधानात् ॥ तदाह बोधयनः ॥ सगो
त्रां चेदमत्योपयछेन्मातृवत्तांपालयेत् ॥ गौतमश्च ॥ असमानप्र
वरैर्विवाह इति ॥ ऊगातातपापि ॥ परिणीय सगोत्रां तु समानप्र

॥ २ ॥

वरांनयां ॥ हरत्वात्तस्याः समुत्सर्गमिति हरछं विज्ञानेधनमिति ॥ आ-
पस्तंबः ॥ समानगोत्रप्रवरां कन्यामूढ्वोपगम्य च ॥ तस्यामुत्पाद्य चां-
डालं ब्राह्मण्यादेव हीयते ॥ संग्रहे ॥ सगोत्रां समानप्रवरां कामतः प-
रिणीय प्रजामुत्पाद्य गुरुतल्पगाव्रतं चरेत् ॥ प्रजां चांडाले भुवि
क्षिपेत् ॥ अकामतस्तत्पत्न छूछं ॥ प्रजायां भरद्वाजांतर्भावः ॥ प्रजो-
त्पादने चांद्रा [illegible] ॥ स्मृत्यर्थसारेपि ॥ रक्षं सगोत्रसंबंधवि-
वाहे समुपस्थिते ऽयणो ॥ विवाहमात्रे हरछं ॥ सर्वत्र व्रतांते ऽष्टो-
त्तरशतहोमः ॥ परित्यक्तां तां जननीवद्रक्षेत् ॥ × यदि कश्चिदज्ञा-
नतस्तां कन्यामूढ्वोपगच्छति ॥ गुरुतल्पव्रताच्छुध्येद्गर्भस्तज्जो-
ऽत्यंतां व्रजेत् ॥ भोगतस्तां परित्यज्य पालयेज्जननीमिव ॥ अस-

॥

नाच्चैदेवस्तुभुध्येद्दर्भस्तु कश्यप इति ॥ अथ प्रसंगाद्गोत्रप्रवरनिर्ण
यः क्रियते ॥ सप्तर्षीणामगस्त्याष्टमानां यदपत्यं तद्गोत्रमिति बौधा
यनादयः ॥ एवं च यद्यपि गोत्रप्रवर्तकं जमदग्निप्रभृति मूलपुरुषं स
प्तर्षिबर्हिर्भूतं भृगुमधिकृत्याम्नातानां केवलभार्गवानामार्ष्टिषेणा
दीनां स्वस्वगणे पि गोत्रता न सिध्यति ॥ तथा केवलांगिरसां विष्णु
वृद्धादीनां संकृत्यादीनां च ॥ गौतमभारद्वाजौ प्रति मूलभूतमंगिरो
मात्रमधिकृत्याम्नानात् ॥ तथाप्यत्रेष्टापत्तिरेव ॥ तथा नस्त एवैषां
गोत्रसगोत्रतेरति प्रवरं जीशलतोक्तं ॥ अत एव बस्मत्स्वर्थसारे ऽपि ॥
केवलभृग्वंगिरोगणेषु प्रवरैक्यमात्रं निषिद्धं तेन विवाहस्त्य
क्तं ॥ ॥ [illegible] वरैक्यतः ॥ स्वं स्वं तिस्त्यागणमिति ॥ अन्ये तु यमधिकृत्य प्र

वराम्नानं तद्गोत्रं ॥ ततश्चार्ष्टिषेणादीनधिकृत्य प्रवराम्नानात्सम
र्षिबाहुल्येपि गोत्रत्वमस्त्येव ॥ तथा च सत्याषाढसूत्रे प्रवराध्या
रव्यास्यामरत्युक्ता ते गोत्राणीत्युक्तं ॥ नच्चैवं भृग्वंगिरसोरप्यनुष
क्तौ जामदग्न्ययोर्वत्सविदयोः परस्परमिवार्ष्टिषेणादिभिरपि स
गोत्रतापत्तिः ॥ तत्र पर्युदासात् ॥ तथा च बौधायनः ॥ एक एव ऋषि
र्यावत्प्रवरेष्वनुवर्तते ॥ तावत्समानगोत्रत्वमन्यत्र भृग्वंगिरोगणादि
ति ॥ भृग्वंगिरोभिन्नस्यैकस्यर्षेरनुवृत्तिः सगोत्रताप्रयोजकेत्यर्
थः ॥ एवं समानगोत्रत्वमित्यस्य समानप्रवरत्वमित्यर्थोपि म
दनपारिजातोक्तोऽस्मिन्पक्षेनादरणीयः ॥ एवं सति सगोत्रत्वेचे
न विवध्यसिद्धौ समानप्रवरत्वस्यासंकीर्णोदाहरणं दुर्लभमिति

तन्नावत्सार्ष्टिषेणयोर्विदार्ष्टिषेणयोः एषपदभ्वरव्यीतरयोश्च भि
न्नगोत्रयोः समानप्रवरत्वात् ॥ तस्माद्धरितादीनामपि गोत्रत्वमि
त्याहुः ॥ यद्यपि गोत्राणामवांतरभेदाः सहस्रशस्तथापि तद्दर्श
नेकोनपंचाशत् ॥ तथा च बौधायनः ॥ गोत्राणां च सहस्राणि
प्रयुतान्यर्बुदानि च ॥ ऊनपंचाशदेवेषां प्रवरा ऋषिदर्शनात् ॥
इति ॥ सप्तेत भृगवः सप्तदशांगिरस एव च ॥ ततो त्रयश्च चत्वारो
बोद्धव्याः कश्यपास्त्रयः ॥ चत्वारोत्र वसिष्ठाः स्युर्विश्वामित्रास्त्र
तो दश ॥ अगस्तयश्च चत्वार इति संग्रहहृद्धृद्धपः ॥ ॥ तत्र भृगुगणां
सप्तांतर्गणाः ॥ तत्र द्वौ जामदग्न्यौ ॥ वत्सा विदाश्चेति ॥ तत्र वत्साना
पंचप्रवराः ॥ भार्गवच्यावनआप्नवानौर्वजामदग्न्येति ॥ भार्गवे

वैजामदग्न्येतित्रयो वा ॥१॥ विदानां पंच प्रवराः ॥ भार्गवच्य
वनाप्नवानौर्वविदेति ॥ त्रयो वा ॥ भार्गवऔर्वजामदग्न्येति ॥२॥
रमौ द्वौ सगोत्रौ ॥ जमदग्नेः सप्तर्षिषु पाठात् ॥ इतरे पंच केवल
भार्गवाः ॥ आर्ष्टिषेणाः यस्काः मित्रयुजः वैन्याः शुनका इति ॥
तत्र आर्ष्टिषेणानां पंच प्रवराः ॥ भार्गवच्यवनआप्नवानआ
र्ष्टिषेणआनूपेति ॥ भार्गवार्ष्टिषेणानूपेति त्रयो वा ॥ एषां त्रया
णां परस्परमविवाहः ॥ तदुक्तं ॥ जामदग्न्या वत्सविदा वार्ष्टि
षेणाः परस्परं ॥ नाभियुः प्रवरैक्येन सगोत्रत्वेन चाप्यमी इति ॥३॥
यस्कानां त्रयः प्रवराः ॥ भार्गववैतहव्यसावेतसेति ॥४॥ मित्रयु
जां त्रयः ॥ भार्गवदिवोदासवाध्र्यश्वेति ॥ एको वा ॥ वाध्र्यश्वेति ॥५॥६॥

वैन्यानां त्रयः ॥ भार्गव वैन्य पार्थेति ॥ ६ ॥ शुनकानामेकार्षेयः प्रवरः
शौनकेति ॥ गार्त्समदेति वा ॥ गृत्स गृत्समदौ द्वौ वा ॥ भार्गव शौनहो
त्र गार्त्समदास्त्रयो वा ॥ भार्गव शौनक गार्त्समदास्त्रयो वेति ॥ ७ ॥
एषां चतुर्णां परस्परं विवाहोस्ति ॥ प्रवैक्ये स्मिन्भिन्नवत्स्यमा
नेभ्य ॥ तदुक्तं ॥ यस्का मित्रयुजो वैन्याः शुनकाः प्रवरैक्यतः ॥ स्वं
स्वं हित्वा गणं सर्वे विवाहेयुः परावरैरिति ॥ वत्साः सप्त वंश्यानि
र्जिताः ॥ कश्चित्तु अधिकगणद्वयमुक्तं ॥ वेद विश्वज्योतिषां त्र्यार्षे
यः प्रवरः ॥ भार्गव वैद विश्वज्योतिषेति ॥ शाठरमाठरां ॥ भार्ग
व शाठरमाठरेति त्रयः ॥ ॥ आंगिरसां षोडशानां गणाः ॥ त
त्र गौतमांगिरसां सप्त ॥ आयास्याः शारद्वतः कौमंडाः दीर्घतमसः वा

रेणुपालादयः वामदेवादयः औशनसाश्चेति॥ तत्र आयास्यानांत्रयःप्रव
राः आंगिरस आयास्य गौतमेति॥८॥ शरद्वतां चत्रयः आंगिरसगौ
तमशारद्वतेति॥९॥ कौमंडानां पंच॥ आंगिरसौतथ्यकाक्षीवंत गौत
म कौमंडेति॥१०॥ दीर्घतमसां पंच॥ आंगिरसऔतथ्य काक्षीवंत
गौतमदैर्घतमसेति॥ त्रयो वा॥ आंगिरसौतथ्यदैर्घतमसेति॥११॥
कारेणुपालानांत्रयः॥ आंगिरसगौतमकारेणुपालेति॥१२॥ वाम
देवानांत्रयः॥ आंगिरस गौतम वामदेवेति॥१३॥ औशनसानांत्रयः॥
आंगिरसौशनस गौतमेति॥१४॥ एते सप्त सगोत्राः॥ वामदेवा गौत
मारत्साप स्तंवः॥ तेषामांगिरस वामदेव बार्हदुक्थ्येतित्रयः॥ औत
थ्या गौतमा रतिकेचित्॥ तेषामांगिरसौतथ्या गौतमेति॥ औशि

जाइत्यपि वेचित्॥ तेषामांगिरसोशिज काक्षीवतेति॥ ॥भरद्वाजां
गिरसश्चत्वारः॥ भरद्वाजाः शैक्षायणाः गर्गाः कपयइति॥ तत्र भर
द्वाजानां त्रयः प्रवराः॥ आंगिरस बार्हस्पत्य भारद्वाजेति॥ १५॥ शैक्षा
यणानां पंच प्रवराः॥ आंगिरस बार्हस्पत्य भारद्वाज वादनमातव
चसेति॥ १६॥ गर्गाणां पंच॥ आंगिरस बार्हस्पत्य भारद्वाज गार्ग्य
सैन्येति॥ त्रयो वा॥ आंगिरस सैन्य गार्ग्येति॥ भारद्वाज गार्ग्य सैन्येति॥ १७॥
कपीनां त्रयः प्रवराः॥ आंगिरस आमहीयव औरुक्षयसेति॥ पंच प्रव
रस्तु कपि गर्गतिर्भृतः अनेनस गोत्रश्च बोध्यः॥ अत एव वाष्टदत्ताधा
गणाच्चिभजद्भिः संग्रहकारैः कपेः रूपिनासमं विवाहो निषिद्धः॥ भर
द्वारजगणस्यापि तथा कपिगणस्य च॥ विवाहो न विधेयः स्यादन्यो

यं तु कदाचने ति॥१८॥ एतेषां मेचतुर्णां परस्परं विवाहो नास्ति॥

तदुक्तं॥ [illegible] भरद्वाजाः सकपयो गार्गो शैक्षायणा इति॥ चत्वारो विप्र

भरद्वाजा गोत्रे कन्या नाधिगच्छति॥ ॥केवलांगिरसः पंच

विष्णुवृद्धाः कण्वाः हरितारथीतरामुद्गलाश्चेति॥ तत्र विष्णुवृ

द्धानां त्रयः प्रवराः॥ आंगिरस पौरुकुत्स त्रासदस्यवेति॥ एषाम

न्यैः सह विवाहोस्ति॥१९॥ कण्वानां त्रयः प्रवराः॥ आंगिरसा जै

मीढ कण्वेति॥ आंगिरस घोर कण्वेति वा॥२०॥ हरितां त्रयः प्र

वराः॥ आंगिरसांबरीषयौवनाश्वेति॥ मांधात्रांबरीषयौवना

श्वेति वा॥२१॥ रथीतराणां त्रयः प्रवराः आंगिरस वैरूप रथी

तरेति॥ आंगिरस वैरूप पार्षदस्येति वा॥२२॥ मुद्गलानां त्रयः

१६॥

प्रवराः ॥ आंगिरसभार्म्यश्वमुद्गलेति ॥ तार्क्ष्यभार्म्यश्वमुद्गलेति ॥ ह-
विष्णुवृद्धादीनां पंचानामपि केवलांगिरसां स्वस्वगणं हित्वाऽन्यैः स-
ह विवाहोऽस्ति ॥ तदुक्तं ॥ केवलांगिरसश्चैके विष्णुवृद्धाः सकण्वकाः ॥
हरितारथीतराश्चमुद्गलाः प्रवरैक्यतः ॥ स्वस्वं हित्वा गणं सर्वे वि-
वाहेयुः परावरैरिति ॥ तदेवं आंगिरसाः षोडशावंशगा निर्णीताः ॥
द्व्यामुष्यायणवर्गे वक्ष्यमाणाः संकृतयस्त्वंगिरसस्तु सप्तदश ॥
क्वचित्तु अन्येपि केवलांगिरसः प[illegible]ते ॥ यथा ॥ कुत्सानांत्रयः
आंगिरसमांधातृकौत्सेति ॥ एषां हरितैरविवाहः ॥ त्र्यार्षे-
याणां द्व्यार्षेयसंनिपातात् ॥ हरितकुत्सपिंगशांखदर्भै-
मगवानामित्याश्वलायनेन सर्वप्रवरसाम्योक्तेश्चेतिपुत्सो

तमः ॥ पृषदश्वानां आंगिरसपार्षदश्ववैरूप्येति ॥ अष्टदंष्ट्र पार्षदश्व
वैरूपेति वा ॥ एषां रथीतरैश्च विवाहः ॥ प्रवरद्वयसाम्यात् ॥ अत्रेश्चत्वा
रो भेदाः ॥ आद्यास्त्र्यार्षेयः ॥ गविष्ठिराः वाद्भूतकाः मुद्गलाश्चेति ॥ तत्राद्या
त्रीणां त्र्यार्षेयः प्रवराः ॥ आत्रेयार्चनानसश्यावाश्वेति ॥२४॥ गविष्ठिरा
णां त्र्यार्षेयः प्रवराः आत्रेयार्चनानसगाविष्ठिरेति ॥२५॥ वाद्भूतकानां
त्र्यार्षेयः आत्रेयार्चनानसवाद्भूतकेति ॥२६॥ मुद्गलानां त्र्यार्षेयः प्रवराः आ
त्रेयार्चनानसपौर्वातिथेति ॥ एतेषां चतुर्णां न विवाहः ॥ तदुक्तं ॥
चत्वारो ह्यत्रयः आद्यास्त्रिवाद्भूतकगविष्ठिरमुद्गलाश्चेति ॥ गोत्रैक्या
त्प्रवरैक्याच्च नां चिपुरिति ॥२७॥ अत्रेश्चत्वारो वंशा निर्दिष्टाः ॥ ॥७॥
कश्यपानां त्रयो भेदाः ॥ निध्रुव रेभ शांडिलेति ॥ तत्र निध्रुवाणां
त्र्यार्षेयः प्रवराः ॥ काश्यपावत्सारनिध्रुवेति ॥२८॥ रेभाणां त्र्यार्षेयः प्र

॥७॥

वराः काश्यपावत्सारनैध्रुवेति ॥ २९ ॥ शांडिल्यानां त्रयः ॥ काश्यपा
वत्सारशांडिल्लेति ॥ काश्यपावत्सारदेवलेतिवा ॥ काश्यपावत्सा
रासितेतिवा ॥ शांडिल्यासितदेवलेतिवा ॥ ३० ॥ निध्रुवाणां त्रयाणां
कश्यपानां परस्परं नो विवाहः ॥ नात्र प्रवरयोरैक्यात् ॥ वसिष्ठाश्च
त्वारः ॥ वसिष्ठाः कुंडिनाः उपमन्यवः पराशरा इति ॥ तत्र वसिष्ठा
नामेकः प्रवरः ॥ वासिष्ठेति ॥ त्रयो वा ॥ वासिष्ठेंद्रप्रमदाभ
रद्वस्विति ॥ ३१ ॥ कुंडिनानां त्रयः ॥ वासिष्ठमैत्रावरुणकौंडिन्ये
ति ॥ ३२ ॥ उपमन्यूनां त्रयः ॥ वासिष्ठेंद्रप्रमदाभरद्वस्विति ॥ ३३ ॥
पराशराणां त्रयः ॥ वासिष्ठशाक्त्यपराशरेति ॥ ३४ ॥ एषां प
रस्परं न विवाहः ॥ तदुक्तं ॥ वसिष्ठाः कुंडिनाश्चैव ह्युपमन्यु

पराशराः॥ वसिष्ठा इति चत्वारो गोत्रैक्याच्चान्विवुर्भिथ इति

वसिष्ठवंशनिर्णयः॥ ॥अथ विश्वामित्राः॥ ते च दश॥ कुशिकाः रो

हिताः रौक्षकाः कामकायनाः कताः धनंजयाः अजाः अघमर्षणाः

पूरकाः इंद्रकौशिका इति॥ तत्र कुशिकानां त्रयः प्रवराः विश्वामित्र

देवरात औदलेति॥३५॥ रोहितानां त्रयः॥ विश्वामित्राष्टकरो

हितेति॥३६॥ रौक्षणां कौत्रयः। विश्वामित्र रौक्षकरैवणेति॥३७॥

कामकायनानां त्रयः॥ विश्वामित्र देवश्रवसदैवतरसेति॥३८॥

धनंजयानां त्रयः॥ वैश्वामित्र माधुछंदस धानंजयेति॥३९॥

कतानां त्रयः॥ वैश्वामित्र कात्यात्किलेति॥४०॥ अजानां त्रयः॥

विश्वामित्र माधुछंदसाजेति॥४१॥ अघमर्षणानां त्रयः॥ वि

॥१८॥

॥१८॥

।श्वामित्राघमर्षणकौशिकेति॥४२॥पूरणानांद्वौ॥विश्वामित्रपूरणे
ति॥४३॥इंद्रकौशिकानांद्वयं॥विश्वामित्रेंद्रकौशिकेति॥४४॥एतेषांद
शानांपरस्परंनविवाहः॥इति विश्वामित्रवंशनिर्णयः॥ ॥अथा
गस्त्यः॥ते च चत्वारः इध्मवाहाः सांभवाहाः सोमवाहा यज्ञवाहाश्चे
ति॥तत्रेध्मवाहानांत्रयः प्रवराः।आगस्त्यदार्ढच्युतेध्मवाहेति॥४५॥
सांभवाहानांत्रयः॥अगस्त्यदार्ढच्युतसांभवाहेति॥४६॥सोमवा
हानांत्रयः॥आगस्त्यदार्ढच्युतसोमवाहेति॥४७॥यज्ञवाहानांत्रयः॥
आगस्त्यदार्ढच्युतयज्ञवाहेति॥४८॥एषांचतुर्णां गोत्रेक्यात्पर
स्परमविवाहः॥तदेवं भार्गवाः सप्त।आंगिरसाः सप्तदश।अत्रयश्च
त्वारः।कश्यपाश्चत्वारः॥वसिष्ठाश्चत्वारः।विश्वामित्रादश॥अ

गस्त्य श्चत्वारः॥ इत्थमेकोनपंचाशद्गणा निर्णइताः॥ ॥क्षत्रियाणां त्रयः प्रवराः॥मानवैलपौरूरवसेति॥वैश्यानां त्रयः॥भालंदनवात्सप्रमांगलिकेति बौधायनः॥न चैवं क्षत्रियवैश्ययोः सजातीयैर्विवाहस्तएव न स्यादिति वाच्यं॥एतेषां प्रवराणां विवाहनिषेधाप्रयोजकत्वात्॥तदुक्तं॥गुरोः सगोत्रप्रवरान्नोद्वाह्याः क्षत्रविज्जनेरिति॥समानप्रवरोद्वाहनिषेधः क्षत्रवैश्ययोः॥प्रवरान्मानवेत्यस्मात्प्रवराच्चान्यगोचर इति च॥मानवेत्यादिप्रवरात् अस्माच्च भालंदनेत्यादिप्रवराच्चान्यगोचरो निषेध इत्यन्वयः॥अथ द्व्यामुष्यायणाः॥तत्रांगिरससंहृतीनां त्रयः प्रवराः॥आंगिरसगौरिवीतिसांहृत्येति॥शाक्यगौरिवीतिसांहृत्येति॥संहृतानां वसिष्ठैः सत वि

॥१९॥

॥१९॥

वाहो नास्ति ॥ व्रियमाणतयाऽनुवृत्त्यभावेपित्युत्पादकतया वसि
ष्ठस्यानुवृत्तेः ॥ उक्तं च ॥ संवृतीनां द्विवंशत्वाद्वासिष्ठैश्च चतुर्विधैः
स्ववर्गीयैः स्वगोत्रैश्चास्त्र वरैक्याच्च नाचयइति ॥ लौगाक्षीणां त्रयः ॥
काश्यपा वत्सार वासिष्ठेति ॥ नैध्रुवत्वर्वसिष्ठानन्तं काश्यपाः ॥ वसि
ष्ठकश्यपाभ्यां सत्लौगाक्षीणां विवाहो नास्ति ॥ तदुक्तं ॥ वासिष्ठैः
काश्यपैर्नित्यं लौगाक्षीणामनचयः ॥ अतेर्वसिष्ठौ त्रिष्ठ प्रायाजा
त्यादिगोचरेति ॥ किंच ॥ विश्वामित्राप्रिगोत्रैर्येनो द्वेहेयुर्धनंजयाः ॥
अत्रेस्तुपुत्रिकापुत्रावामरथ्यादयास्तथा ॥ तथैव जातूकर्ण्या
श्च वसिष्ठैरत्रिभिः सहेति ॥ धनंजयावामरथ्यादयाश्चात्रिवि
श्वामित्राभ्यां न विवाहे इत्यर्थः ॥ तथा जातूकर्ण्याश्चात्रिवसि

ष्याव्योर्न विवाहे स्यः॥ भरद्वाजेच शुंगेन विश्वामित्रस्य शैशिरेः।
क्षेत्रे जातो द्विगोत्रर्षिः प्रोच्यते शौंगशैशिरिः शौंगऽस्याप्युच्यते।
तस्य पंचप्रवराः। आंगिरस बार्हस्पत्य भरद्वाज कात्याक्षीलर
ति॥ कपिलानां भरद्वाजे विश्वामित्रेश्च नाच यः॥ अन्यत्रापि।
काश्यपेय गणस्यापि वसिष्ठस्य गणस्य च॥ संकृतिपूतिमाषा
ख्यां विवाहो न परस्परं॥ आत्रेयश्च गणस्यापि विश्वामित्र
गणस्य च द्व्यामुष्यायणाः परस्परेन देवरात गोत्रेण विवाहः
स्यात् परस्परं॥ धनंजयास्य गोत्रेणान्योन्यं पाणिपीडनं॥
जमदग्निगणस्यापि विश्वामित्रगणस्य च। इति द्व्यामुष्या
यणाः॥ गोत्रमस्य त्रयोदशपुत्राः॥१२॥ तेषां मध्ये वसिष्ठे

॥१०॥

न गृहीताः षट् ॥ ६ ॥ कश्यपेन गृहीताः षट् ६ ॥ उर्वरितः एकः दिवा वशि-
ष्ठेन गृहीताः ॥ रात्रौ कश्यपेन गृहीतः ॥ सर्व अहर्वशिष्ठः स्मृतः ॥

प

नक्तं कश्यपे स्मृतः ॥